# विविधप्रश्नावलिः - 2

**1. प्रश्नानाम् एकपदेन उत्तरं लिखत—**

क. भूमेः गुरुतरा का?

ख. आतुरस्य मित्रं किम्?

ग. वसन्तपञ्चमी कस्य आगमनं सूचयति?

घ. वसन्तोत्सवे कस्याः पूजनं भवति?

ङ. चन्द्रशेखरस्य जन्म कस्मिन् ग्रामे अभवत्?

च. चन्द्रशेखरः कां भाषाम् अधीतवान्?

छ. अस्तसमये सूर्यस्य वर्णः कः भवति?

ज. नरत्वं दुर्लभं कुत्र?

झ. जयन्तः सीताचरणे किं कृतवान्?

ञ. चित्रकूटे जलप्रपातस्य किं नाम?

ट. पुष्पस्रजं कण्ठे कः समर्पयति?

ठ. अहिल्यायाः व्यक्तित्वं कथं वर्तते?

ड. माहिष्मती कस्य राजधानी आसीत्?

**2. प्रश्नानाम् एकवाक्येन उत्तरं लिखत—**

क. युधिष्ठिरस्य मातुः नाम किम्?

ख. प्रसन्नोभूत्वा यक्षः किम् अकरोत्?

ग. ऋतुराजवसन्तस्य आगमनसूचना कदा भवति?

घ. तमिलनाडुराज्ये जनाः शारदां कथम् अर्चयन्ति?

ङ. स्वाधीनतान्दोलने के  के चन्द्रशेखरस्य सहायकाः अभवन्?

च. चन्द्रशेखरः कथं वीरगतिं प्राप्नोत्?

छ. वृक्षाणां स्वभावः कीदृशः?

ज. न्याय्यात्पथः पदमपि के न विचलन्ति?

झ. हनुमान्धारा इति नाम कथं प्रसिद्धम्?

ञ. निर्झराः कीदृशाः वर्तन्ते?

ट. धर्मराज्यसंस्थापनार्थं श्रीरामदासेन का आशीः प्रदत्ता?

ठ. शिवराजस्य गुरुः कः आसीत्?

ड. अहिल्याबाई कीदृशी महिला आसीत्?

ढ. अहिल्याबाई कदा जन्म अलभत?

### 3. रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत —

क. उदयास्तसमये रविः ताम्रवर्णः भवति।

ख. वृक्षाः अन्येभ्यः छायां कुर्वन्ति।

ग. न्याय्यात्पथः पदं न प्रविचलन्ति धीराः ।

घ. वर्जयेत् तादृशं मित्रम्।

ङ. विविधैः पुष्पैः ऋतुराजस्य स्वागतं भवति।

च. पुस्तकानाम् अपि पूजनं भवति।

छ. शारदाम् अर्चयन्ति।

ज. रामघट्टः मन्दाकिन्याः तटे अस्ति।

झ. सः प्रातः विद्यालयं गच्छति।

ञ. एषः मम अग्रजः अस्ति।

ट. चित्रकूटं सतना मण्डले अस्ति।

ठ. अहं मालवप्रदेशतः आगच्छामि।

ड. राज्ञा महिष्मता निर्मिता माहिष्मती।

ढ. रघुवंशे माहिष्मतीवर्णनम् अस्ति।

### 4. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—

क. माता ............... गुरुतरा अस्ति। (भूमिः / भूमेः)

ख. ................ भिषङ्मित्रं भवति। (आतुरः / आतुरस्य)

ग. वसन्तपञ्चमी ................ नाम्ना अपि ज्ञायते। (श्रीपञ्चमी / ऋषिपञ्चमी)

घ. चन्द्रशेखरस्य पितुः नाम ................. आसीत्। (सीतारामः / दयारामः)

ङ. चित्रकूटे रामचन्द्रः ................. यावत् निवासं कृतवान्। (चतुर्दशवर्षाणि/एकादशवर्षाणि)

च. भवान् कुतः ............। (आगच्छति/आगच्छसि)

छ. राजवाड़ास्थानं ................... वर्तते। (उपेक्षणीयम्/प्रेक्षणीयम्)

### 5. अधोनिर्दिष्टैः अव्ययैः वाक्यानि रचयत—

कदा, च, तत्र, विना, अत्र, अद्य, तु

6. नामोल्लेखपूर्वकं सन्धिं कुरुत—

| | सन्धिविच्छेदः | सन्धिशब्दः | सन्धिनाम |
|---|---|---|---|
| क. | शक्तिः + तत्र | ........................ | ........................ |
| ख. | षट् + एते | ........................ | ........................ |
| ग. | अत्र + एव | ........................ | ........................ |
| घ. | किम् + अर्थम् | ........................ | ........................ |
| ङ. | कालात् + एव | ........................ | ........................ |
| च. | अहः + निशम् | ........................ | ........................ |
| छ. | खादन् + अपि | ........................ | ........................ |

7. लकार परिवर्तनं कुरुत—

| | लट् | लोट् |
|---|---|---|
| क. | रक्षति | ..................... |
| ख. | .................... | रक्षाणि |
| ग. | गच्छसि | ...................... |
| घ. | ........................ | गच्छाम |
| ङ. | ...................... | पिबन्तु |
| च. | .......................... | पिबत |
| छ. | शृणुथः | ....................... |
| ज. | याचतः | ...................... |
| झ. | ......................... | स्मराम |
| ञ. | पचन्ति | ........................ |

8. उचितं मेलयत—

| | (अ) | | (ब) |
|---|---|---|---|
| क. | मरिष्यतः मित्रम् | – | भार्या |
| ख. | गृहे मित्रम् | – | भ्रमराः दृश्यन्ते |
| ग. | मञ्जरीं परितः | – | दानम् |
| घ. | चन्द्रशेखरेण अधीतम् | – | वेत्रप्रहारैः |
| ङ. | सर्वाः | – | संस्कृतम् |
| च. | चन्द्रशेखरः मूर्च्छितः | – | विद्याः |

छ. शङ्कर-मण्डनमिश्रयोः शास्त्रचर्चा – राजवाड़ा

ज. इन्दौरनगरे – महेश्वरस्थाने

9. **पूर्तिं कुरुत—**

क. उद्यमं ......................धैर्यं, ...................... पराक्रमः।

......................... वर्तन्ते, .......................... सहायकः॥

ख. उदये ...................... ताम्रः, ......................तथा।

सम्पत्तौ च .................... च, ......................।

10. **अधोलिखितगद्यांशं पठित्वा उत्तराणि लिखत—**

प्राचीनकाले वसन्तपञ्चम्यां ज्ञानयज्ञतपस्वरूपां सरस्वतीं जनाः पूजयन्ति स्म। अधुना अपि सम्पूर्णे देशे आध्यात्मिकजिज्ञासया अस्मिन् दिने जनाः ज्ञानस्य अधिष्ठात्रीं शारदां पूजयन्ति। वसन्तोत्सवः वस्तुतः सांस्कृतिकः उत्सवः अस्ति। वैदिककालात् एव अस्मिन् दिने सरस्वत्याः उपासना भवति।

क. प्राचीनकाले वसन्तपञ्चम्यां जनाः कां पूजयन्ति स्म?

ख. अधुना जनाः वसन्तपञ्चम्यां देशे कां पूजयन्ति?

ग. वसन्तोत्सवः कीदृशः उत्सवः अस्ति?

घ. कस्मात् कालात् वसन्तपञ्चम्यां सरस्वती उपासना भवति?

(अथवा)

अङ्केशः — पुनः पुनः स्मरतु। प्राचीनकालतः अवन्तिकानाम्ना प्रसिद्धा उज्जयिनी, माहिष्मतीनाम्ना प्रशस्तः महेश्वरश्चेति स्थानद्वयं मालवक्षेत्रे अन्तर्भवति।

अञ्जना — राज्ञा महिष्मता निर्मिता माहिष्मती महेश्वरनगरमेव अस्ति। अनूपदेशस्य राज्ञः सहस्त्रार्जुनस्य राजधानी अपि आसीत्।

क. उज्जयिन्याः अपरं नाम किम्?

ख. महेश्वरस्य अपरं नाम किम्?

ग. सहस्रार्जुनः कस्य देशस्य नृपः आसीत्?

घ. सहस्रार्जुनस्य राजधानी कस्मिन् नगरे आसीत्?

## 11. अधोलिखितं पद्यं पठित्वा उत्तराणि लिखत—

उदये सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

क. उदये सवितुः वर्णः कः भवति?

ख. अस्तङ्गते सवितुः कः वर्णः भवति?

ग. सम्पत्तौ विपत्तौ च केषाम् एकरूपता?

घ. उदये इति पदे का विभक्तिः अस्ति?

अथवा

माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

क. भूमेः गुरुतरा का?

ख. पिता कस्मात् उच्चतरः?

ग. वातात् शीघ्रतरं किम्?

घ. तृणात् बहुतरी का?

## 12. उचितविकल्पं चित्वा लिखत—

क. वसन्तपञ्चमी पर्व भवति।
(फाल्गुनमासे / चैत्रमासे / माघमासे / कार्तिकमासे)

ख. चन्द्रशेखरस्य जन्म अभवत्।
(जुलाईमासे / मईमासे / अगस्तमासे / जूनमासे)

ग. सम्पतौ च विपत्तौ च महतां भवति।
(अनेकरूपता / भिन्नरूपता / एकरूपता / विविधरूपता)

घ. 'सत् + आचारः' अस्ति।
(स्वरसन्धिः / व्यञ्जनसन्धिः / विसर्गसन्धिः / प्रकृतिभावसन्धिः)

ङ. विद्यालयः अस्ति।
(अव्ययीभावसमासः / तत्पुरुषसमासः / द्वन्द्वसमासः / द्विगुसमासः)

च. अहिल्याबाई इत्यस्य पत्युः नाम आसीत्। (दामोदररावः/खण्डेरावः/ मल्हाररावः/कृष्णरावः)